श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीहयग्रीवाष्टोत्तरशतनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीहयग्रीवाष्टोत्तरशतनामस्तोत्रम् ॥

शृण्वन्तु ऋषयः सर्वे हयस्याष्टोत्तरं शतम्।
हयग्रीवो महाविष्णुः केशवो मधुसूदनः ॥ १ ॥

गोविन्दः पुण्डरीकाक्षो विष्णुर्विश्वम्भरो हरिः।
आदित्यः सर्ववागीशः सर्वाधारः सनातनः ॥ २ ॥

निराधारो निराकारो निरीशो निरुपद्रवः।
निरञ्जनो निष्कलङ्को नित्यतृप्तो निरामयः ॥ ३ ॥

चिदानन्दमयः साक्षी शरण्यः सर्वदायकः।
श्रीमान् लोकत्रयाधीशः शिवः सारस्वतप्रदः ॥ ४ ॥

वेदोद्धर्ता वेदनिधिर्वेदवेद्यः प्रभूत्तमः।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिः परात्परः ॥ ५ ॥

परमात्मा परञ्ज्योतिः परेशः पारगः परः।
सर्ववेदात्मको विद्वान् वेदवेदान्तपारगः ॥ ६ ॥

सकलोपनिषद्वेद्यो निष्कलः सर्वशास्त्रकृत्।
अक्षमालाज्ञानमुद्रायुक्तहस्तो वरप्रदः ॥ ७ ॥

पुराणः पुरुषश्रेष्ठः शरण्यः परमेश्वरः।
शान्तो दान्तो जितक्रोधो जितामित्रो जगन्मयः ॥ ८ ॥

जन्ममृत्युहरो जीवो जयदो जाड्यनाशनः।
जपप्रियो जपस्तुत्यो जापकप्रियकृत् प्रभुः ॥ ९ ॥

विमलो विश्वरूपश्च विश्वगोप्ता विधिस्तुतः।
विधीन्द्रशिवसंस्तुत्यः शान्तिदः क्षान्तिपारगः ॥ १० ॥

www.prapatti.com

श्रेयः प्रदः श्रुतिमयः श्रेयसांपतिरीश्वरः ।
अच्युतोऽनन्तरूपश्च प्राणदः पृथिवीपतिः ॥ ११ ॥

अव्यक्तो व्यक्तरूपश्च सर्वसाक्षी तमोहरः ।
अज्ञाननाशको ज्ञानी पूर्णचन्द्रसमप्रभः ॥ १२ ॥

ज्ञानदो वाक्पतिर्योगी योगीशः सर्वकामदः ।
महायोगी महामौनी मौनीशः श्रेयसांपतिः ॥ १३ ॥

हंसः परमहंसश्च विश्वगोप्ता विराट् स्वराट् ।
शुद्धस्फटिकसङ्काशो जटामण्डलसंयुतः ॥ १४ ॥

आदिमध्यान्तरहितः सर्ववागीश्वरेश्वरः ।
नाम्नामष्टोत्तरशतं हयग्रीवस्य यः पठेत् ॥ १५ ॥

वेदवेदाङ्गवेदान्तशास्त्राणां पारगः कविः ।
वाचस्पतिसमो बुद्ध्या सर्वविद्याविशारदः ॥ १६ ॥

महदैश्वर्यमासाद्य कलत्राणि च पुत्रकान् ।
अवाप्य सकलान् भोगान् अन्ते हरिपदं व्रजेत् ॥ १७ ॥

॥ इति पराशरपुराणे अगस्त्यनारद संवादे
हयग्रीवाष्टोत्तरशतनामस्तोत्रम् सम्पूर्णम् ॥

www.prapatti.com